http://www.sgbauonline.com/



# M.A. Part–I (Semester–I) Examination

## SANSKRIT

## Paper—1

## (Vedic Literature)

Time : Three Hours] [Maximum Marks : 80

**सूचना :—** निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखत।

(ऋग्वेदः)

1. (अ) **द्वयोः** ऋचोः सविवरणमनुवादं कुरुत :— 6

(i) उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत।
अवाधमानि जीवसे।

(ii) किमिच्छन्ती सरमा प्रेदमानड्
दूरे ह्यध्वा जगुरिः पराचैः।
कास्मेहितिः का परितक्म्यासीत्
कथं रसाया अतरः पयांसि।।

(iii) राजन्तमध्वराणां गोपामृतस्य दीदिविम्।
वर्धमानं स्वे दमे।।

(ब) अग्निदेवतायाः वर्णनं लिखत। 10

अथवा

वरूणसूक्तस्य रसग्रहणं कुरुत।

(अथर्ववेदः)

2. (अ) **द्वयोः** मन्त्रयोः सविवरणमनुवादं लिखत :— 6

(i) उपहूतो वाचस्पतिरूपास्मान् वाचस्पतिर्ह्वयताम्।
सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि।।

(ii) अभि त्वा देवः सविताभि सोमो अवीवृधत्।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि।।

(iii) इहैव ध्रुवा प्रति तिष्ठ शालेऽश्वावती गोमती सूनृतावती।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय।।

(ब) शालानिर्माणसूक्तस्य स्पष्टीकरणं कुरुत। 10

अथवा

राष्ट्राभिवर्धनसूक्तस्य सारं लिखत।

(कठोपनिषद्)

3. (अ) **एकस्य** प्रश्नस्य सविस्तरम् उत्तरं लिखत :— 10

(i) कठोपनिषदः तृतीयवल्ल्याः सारं लिखत।

(ii) आत्मनः स्वरूपं कठोपनिषदः आधारेण स्पष्टीकुरुत।



http://www.sgbauonline.com/

(ब) टिप्पणीद्वयं लिखत :- 6

(i) नचिकेतसः तृतीयवरः।

(ii) श्रेयप्रेयविवेकः।

(iii) नाचिकेताग्निः।

(iv) आत्मनः इंद्रियपृथक्त्वम्।

(निरुक्तम्)

4. (अ) त्रयाणां वाक्यानां ससंदर्भविवरणं कुरुत :- 12

(i) तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति।

(ii) षड्भावविकारा भवन्तीति वार्ष्यायणिः।

(iii) उच्चावचाः पदार्था भवन्तीति गार्ग्यः।

(iv) नु इत्येषोऽनेककर्मा।

(v) एवमुच्चावचेष्वर्थेषु निपतन्ति।

(ब) कयोरपि द्वयोः निर्वचनं लिखत :— 4

(i) शाखा

(ii) निघण्टुः

(iii) हस्तः

(iv) दण्डम्।

(वैदिकवाङ्मयपरिचयः)

5. योग्यम् उत्तरं विचिनुत (केऽपि षोडश) :- 16

(1) तलवकाराण्यकं केन सम्बद्धम् ?

(अ) ऋग्वेदेन (ब) यजुर्वेदेन

(क) सामवेदेन (ड) अथर्ववेदेन

(2) ओंकारस्य विवेचनमस्ति ______।

(अ) प्रश्नोपनिषदि (ब) मुण्डकोपनिषदि

(क) माण्डूक्योपनिषदि (ड) ऐतरेयोपनिषदि।

(3) वरुण-भृगु-संवादः वर्तते ______।

(अ) प्रश्नोपनिषदि (ब) तैत्तिरीयोपनिषदि

(क) माण्डूक्योपनिषदि (ड) ऐतरेयोपनिषदि

(4) मनुमत्स्यकथा कस्मिन् ब्राह्मणे विद्यते ?

(अ) ऐतरेयब्राह्मणे (ब) गोपथब्राह्मणे

(क) ताण्डयब्राह्मणे (ड) शतपथब्राह्मणे

(5) 'प्रज्ञानं ब्रह्म' एतत् महावाक्यं केन सम्बद्धम् ?

(अ) ऋग्वेदेन (ब) यजुर्वेदेन

(क) सामवेदेन (ड) अथर्ववेदेन

(6) अथर्ववेदस्य सम्बन्धित: उपनिषद्ग्रन्थ: ?

(अ) कठोपनिषद् (ब) प्रश्नोपनिषद्

(क) कठोपनिषद् (ड) ईशावास्योपनिषद्

(7) उपनिषद् शब्दे क: धातु: ?

(अ) साद् (ब) सद्

(क) शद् (ड) निषाद्

(8) ऋतपा क: ?

(अ) अग्नि: (ब) इन्द्र:

(क) वरूण: (ड) प्रजापति:

(9) 'स जनास इन्द्र:' इति कस्य वाक्यम् ?

(अ) वसिष्ठस्य (ब) गृत्समदस्य

(क) वसिष्ठस्य (ड) अत्रे:

(10) तिलकमहोदयास्यानुसारेण वेदरचनाकाल: ?

(अ) ई.पू. 1200 (ब) ई.पू. 6000

(क) ई.पू. 200 (ड) ई.पू. 10000

(11) सामवेदस्य उपवेद: क: ?

(अ) धनुर्वेद: (ब) आयुर्वेद:

(क) गान्धर्ववेद: (ड) संगीतवेद:

(12) बृहद्देवता ग्रन्थस्य रचनाकार: क: ?

(अ) मङ्गलदेव: (ब) सायणाचार्य:

(क) यास्काचार्य: (ड) शौनक:

(13) शुक्लयजुर्वेदस्य काण्वसंहिताया: कति अध्याया: सन्ति ?

(अ) 40 (ब) 44

(क) 48 (ड) 50

(14) अथर्ववेदस्य ऋत्विज: नाम ________ ।

(अ) उद्गाता (ब) होता

(क) अध्वर्यु: (ड) ब्रह्मा

http://www.sgbauonline.com/

(15) शिवसंकल्पसूक्तं कस्मिन् वेदे वर्तते ?

(अ) ऋग्वेदे (ब) यजुर्वेदे

(क) सामवेदे (ड) अथर्ववेदे

(16) ऋग्वेदस्य षष्ठमण्डलस्य ऋषिः कः ?

(अ) वामदेवः (ब) भरद्वाजः

(क) कण्वः (ड) अत्रि

(17) पुरुषसूक्तस्य क्रमाङ्कः कः ?

(अ) 10 : 129 (ब) 10 : 90

(क) 10 : 121 (ड) 10 : 125

(18) सूर्यः _____ स्थानीया देवता।

(अ) पृथ्वी (ब) अन्तरिक्ष

(क) द्यु (ड) स्वर्गा

(19) अथर्ववेदस्य अपरं नाम _____ ।

(अ) क्षत्रवेदः (ब) आयुर्वेदः

(क) गान्धर्ववेदः (ड) उद्गातृवेदः

(20) कुन्तापसूक्तं कस्मिन् वेदे अस्ति ?

(अ) ऋग्वेदे (ब) यजुर्वेदे

(क) सामवेदे (ड) अथर्ववेदे



http://www.sgbauonline.com/